संस्कृत-वार्ता:

दिनाङ्क:- 20.02.2026 प्रात: - 06:55

अथ वार्ताः

## प्रधानमन्त्री - एआइ इम्पैक्ट्

प्रधानमन्त्री नरेन्द्र-मोदी वैश्विक-हिताय कृतकबुद्धिमत्तायाः विकासं कर्तुं आग्रहं कृतवान् । नवदिल्ल्यां भारतमण्डपे अनेकेषां विश्वनेतॄणाम् उपस्थितौ, ऐषमः भारत-एआइ-इम्पैक्ट् शिखरसम्मेलनस्य उद्घाटनं कुर्वन् प्रधानमन्त्री मोदी उक्तवान् यत्, एआइ इत्यस्मिन् भारतं, अवसरान् भविष्यस्य प्रारूपं च पश्यति । सः कृतक-बुद्धिमत्तायाः लोकतान्त्रिकीकरणे बलं दत्तवान् यदेतत् विशेषतः वैश्विकदक्षिणस्य कृते, समावेशस्य सशक्तिकरणस्य च साधनं भवितुमर्हति । श्रीमोदी अवदत् यत्, विश्वं तस्मिन् युगे प्रविशति यत्र मानवः बुद्धिमत्ता प्रणाली च मिलित्वा सह-निर्माणं, सहकार्यं, सह-विकासं च कुरुतः । सः अवदत् यत्, ए-आई इतीदं, कार्यम् अभिनवम्, अधिकं कार्यक्षमं, अधिकं प्रभावशालिनं च करिष्यति । प्रधानमन्त्रिणा प्रोक्तं यत्, भारतं न केवलं नूतनप्रौद्योगिक्याः विकासं करोति अपितु तीव्रगत्या प्रौद्योगिक्याः स्वीकारमपि करोति ।

## प्रधानमन्त्री सी.ई.ओ::

प्रधानमन्त्री नरेन्द्र मोदी नवदिल्ल्याम्, इण्डिया एआइ इम्पैक्ट् इति भारत-कृतक-बिद्धिमत्ताक-प्रभाव-शिखरसम्मेलने व्यापारिकनेतृभिः सह गोलोत्पीठिका-चर्चा-सभायाः अध्यक्षताम् अकरोत् । सामाजिक-माध्यम-सन्देशे श्रीमोदिना प्रोक्तं यत्, अस्मिन् सम्मेलने, एआइ इत्यस्य, प्रौद्योगिक्याः, नवीनतायाः च जगतः विविध-हितधारकाः एकत्र समागताः ।

## उप-राष्ट्रपतिः

उप-राष्ट्रपतिः सी.पी. राधाकृष्णन् वर्यः, ह्यः, नवदिल्ल्याम्, ओपन्-ए-आई इत्यस्य प्रमुखेन जार्ज ओस्बोर्न् इत्यनेन, ओपन एआइ इत्यस्य मुख्यवैश्विककार्याणां अधिकारिणा क्रिस लेहाने इत्यनेन अथ ओपन एआइ इत्यस्य रणनीतिक-वैश्विककार्याणां भारतप्रमुखया प्रज्ञा मिश्रा इत्यनया सह मिलितवान् । अन्तर्जालीय-माध्यम-सन्देशे उपराष्ट्रपतिः अवदत् यत् अस्मिन् मेलनावसरे, आर्टिफिशियल इन्टेलिजेन्स इत्यस्य उदयमानविकासानां, तस्य अनुप्रयोगानाम्, भारतस्य एआइ परिदृश्यस्य द्रुतविस्तारस्य च विषये चर्चाः अभवन् ।

## कोयम्बटूर विमानस्थानकम्::

अद्य केन्द्रीय नागरिक उड्डयनमन्त्री राममोहन नायडुः, राज्यमन्त्री मुरलीधर-मोहलः, सूचनाप्रसारणराज्यमन्त्री डॉ. एल.मुरुगनः संयुक्तरूपेण कोयम्बटूर-विमानस्थानके उडान-यात्री कैफे इत्यस्य, अथान्य-सुविधानां उद्घाटनं करिष्यन्ति ।

विमानस्थानकस्य निदेशकः मोहम्मद आरिफः ह्यः वार्ताहर-समूहान् अवदत् यत्, विमानस्थानकात् प्रतिदिनं अष्टाविंशतितः त्रिंशत् विमानसेवाः प्रचलन्ति, यत्र विमानयान-सेवा सिङ्गापुर, शारजाह इत्यादि-अन्यदेशानां कृतेऽपि वर्तन्ते ।

**शाह-असमः:**

केन्द्रीय गृहमंत्री अमित शाहः असम राज्यस्य काचर मण्डले, वाइब्रेंट विल्लेजस् इत्यस्य द्वितीय कार्यक्रमस्य शुभारंभं करिष्यति । कार्यक्रमस्य उद्देश्यम्, सीमाग्रामेषु परिष्कारः, स्थायिजीविकायाः अवसराणां निर्माणम्, विकसितभारतस्य दृष्ट्या सुरक्षितसीमा-समुदायस्य पोषणम् च वर्तते ।

**गोयल खाद्य सुरक्षा::**

वाणिज्य-उद्योगमन्त्री पीयूषगोयलः उक्तवान् यत् भारतं वैश्विकखाद्यसुरक्षायाः सशक्त-विश्वसनीय-स्तम्भ-रूपेण विकसति । अन्तर्जालीय-सन्देशे श्रीगोयलेन उक्तं यत्, हरियाणाराज्येन, कृषि-संसाधित-खाद्य-उत्पाद-निर्यात-विकास-प्राधिकरणस्य माध्यमेन मडागास्कर-इत्यत्र सप्त-सहस्रं मेट्रिक-टन-मितम्, पोषणयुक्त-तण्डुलानाम् निर्यातम् कृतम् अस्ति ।

सः अवदत् यत् एषा उपलब्धिः, भारतस्य पोषणक्षमतायाः, प्रौद्योगिकीबलस्य च स्पष्टसाक्ष्यम् अस्ति ।

**क्रिकेट्**

अद्य श्रीलङ्कादेशस्य पल्लेकेले अन्ताराष्ट्रिय-क्रिकेट्-क्रीडाङ्गणे अन्तिमे समूह-बी-सङ्घर्षे आस्ट्रेलिया-देशः ओमान-देशं सम्मुखीकरिष्यति ।

॥ इति वार्ताः॥